
Vaachaspathi
Veda Vidya
www.vaachaspathi.com

# jagannaatha ashTakam

kadaachit kaalindeetaTa vipina sangeeta kavaro
mudaa gopee naareevadana kamalaasvaada madhupaha |
ramaa shambhu brahmaa amarapati gaNeshaarchita pado
jagannaathah swaamee nayanapathagaamee bhavatu me || 1 ||

bhuje savye veNum shirasi shikhipicCham kaTitaTe
Tukulam netraante sahachara kaTaaksham vidadhate |
sadaa shreemad vrundaavana vasati leelaa parichayo
jagannaathah swaamee nayanapathagaamee bhavatu me || 2 ||

mahaambodheh teere kanakaruchire neela shikhare
vasanpraasaadaantah sahajabala bhadreNa balinaa |
subhadraa madhyasthah sakala surasevaa avasarado
jagannaathah swaamee nayanapathagaamee bhavatu me || 3 ||

krupaa paaraavaarah sajala jalada shreNi ruchiro
ramaavaaNee somasphuradamala padmodbhava mukhaihi |
surendrairaaraadhyah shrutigaNa shikhaageeta charito
jagannaathah swaamee nayanapathagaamee bhavatu me || 4 ||

rathaarooDho gacChanpathi milita bhoodeva paTalaih
stuti praadurbhaavam pratipadm upaakarNya sadayaha |
dayaasindhurbandhuh sakala jagataam sindhusutayaa
jagannaathah swaamee nayanapathagaamee bhavatu me || 5 ||

parabrahmaapeeDah kuvalaya dalotphulla nayano
nivaasee neelaadrou nihitacharaNo anantashirasi |
rasaanando raadhaasarasava puraalinganasukho
jagannaathah swaamee nayanapathagaamee bhavatu me || 6 ||

na vai praarthya raajyam na cha kanakataa bhogavibhave
na yaache aham ramyaam nikhilajanakaabhyaam varavadhoom |
sadaakaale kaale pramathapatinaa geetacharito
jagannaathah swaamee nayanapathagaamee bhavatu me || 7 ||

hara tvam samsaaram drutataramasaaram surapate
hara tvam paapaanaam vitatimaparaam yaadavapate |
aho deenaanaatham  nihitamachalam paatumanisham
jagannaathah swaamee nayanapathagaamee bhavatu me || 8 ||

|| iti shreemad shankaraachaarya virachitam jagannaatha ashTakam sampoorNam ||

Copyright Reserved "Vaachaspathivedavidya.com" All rights reserved. Vavilala Srinivasa Sharma(Avadhani)

# जगन्नाथ अष्टकम्

कदाचित् कालिन्दीतट विपिन संगीत कवरो
मुदा गोपी नारीवदन कमलास्वाद मधुपः ।
रमा शंभु ब्रह्मा अमरपति गणेशार्चित पदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 1 ॥

भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे
दुकुलं नेत्रान्ते सहचर कटाक्षं विदधते ।
सदा श्रीमद् वृंदावन वसति लीला परिचयो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 2 ॥

महांबोधेः तीरे कनकरुचिरे नील शिखरे
वसन्प्रासादान्तः सहजबल भद्रेण बलिना ।
सुभद्रा मध्यस्थः सकल सुरसेवा अवसरदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 3 ॥

कृपा पारावारः सजल जलद श्रेणि रुचिरो
रमावाणी सोमस्फुरदमल पद्मोद्भव मुखैः ।
सुरेन्द्रैराराध्यः श्रुतिगण शिखागीत चरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 4 ॥

रथारूढो गच्छन्पथि मिलित भूदेव पटलैः
स्तुति प्रादुर्भावं प्रतिपदं उपाकर्ण्य सदयः ।
दयासिन्धुर्बन्धुः सकल जगतां सिन्धुसुतया
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 5 ॥

Copyright Reserved "Vaachaspathivedavidya.com" All rights reserved. Vavilala Srinivasa Sharma(Avadhani)

परब्रह्मापीड: कुवलय दलोत्फुल्ल नयनो
निवासी नीलाद्रौ निहितचरणो अनन्तशिरसि ।
रसानन्दो राधासरसव पुरालिन्गनसुखो
जगन्नाथ: स्वामी नयनपथगामी भवतु मे ॥ 6 ॥

न वै प्रार्थ्य राज्यं न च कनकता भोगविभवे
न याचेऽहं रम्यां निखिलजनकाम्यां वरवधूम् ।
सदाकाले काले प्रमथपतिना गीतचरितो
जगन्नाथ: स्वामी नयनपथगामी भवतु मे ॥ 7 ॥

हर त्वं संसारं द्रुततरमसारं सुरपते
हर त्वं पापानां विततिमपरां यादवपते ।
अहो दीनानाथं  निहितमचलं पातुमनिशं
जगन्नाथ: स्वामी नयनपथगामी भवतु मे ॥ 8 ॥

॥ इति श्रीमद् शंकराचार्य विरचितं जगन्नाथाष्टकं संपूर्णम् ॥

Copyright Reserved “Vaachaspathivedavidya.com” All rights reserved. Vavilala Srinivasa Sharma(Avadhani)



# Contact

## USA Address Info

Vaachaspathi Veda Vidya
450 Albany,Shaker Road-Loudonville ,
12211 New York USA
Telephone: 518-867-6720
E-mail: info@vaachaspathi.com

## INDIA Address Info

Vaachaspathi Veda Vidya
Vavilala Srinivasa Sharma (Avadhani)
18-4-111/1 , Sagaraveedhi,
LakshmiNagar, Godavarikhani,
Karimnagar, Telangana, India



94 404 82 431
98 484 85 890

www.vaachaspathi.com